Time : 1½ Hours

**SANSKRIT (COMPOSITE)**

**(S.L.)**

**Subject Code**

| S | 1 | 1 | 6 | 3 |
|---|---|---|---|---|

**Total No. of Questions : 29 (Printed Pages : 7) Maximum Marks : 40**

**सूचना :** (*i*) **सर्वे** प्रश्नाः अनिवार्याः सन्ति।

(*ii*) प्रश्नानां क्रमाङ्काः स्पष्टतया लेखनीयाः।

(*iii*) दक्षिणभागे दर्शिताङ्काः गुणाङ्काः सन्ति।

(*iv*) सम्पूर्णे उत्तरपत्रे एकस्याः एव स्वभाषायाः उपयोगः करणीयः।

(स्वभाषा नाम-मराठी, कोंकणी, हिन्दी, आङ्ग्लभाषा वा)

**प्रथमखण्डः (पठितावबोधनम्)**

**अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतभाषया उत्तरत।**

स्वतन्त्रगोवाप्रान्तस्य प्रथमः मुख्यमन्त्री श्रीमान् भाऊसाहेब बान्दोडकरः आसीत्। 'मार्च' मासस्य द्वादशदिनाङ्के अस्य जन्मदिनं वर्तते। सः छात्रेषु अतीव स्निह्यति स्म। अतः सः तेषु रमते स्म। छात्रान् अधिकृत्य सः विपुलानि कार्याणि अकरोत्। गोवामुक्तेः अनन्तरं छात्राणां कृते सः स्थाने-स्थाने विद्यालयान् क्रीडाङ्गणानि च निर्मितवान्। अतः गोमन्तके अस्य जन्मदिनं 'छात्रदिनम्' इति नाम्ना सम्पद्यते।

प्रश्नाः – **एक**वाक्येन उत्तरत।

1. गोवामुक्तेः अनन्तरं छात्राणां कृते भाऊसाहेबः किं कृतवान् ? 1

2. स्वतन्त्रगोवाप्रान्तस्य प्रथमः मुख्यमन्त्री कः ? 1

**अधस्तनं पद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतभाषया उत्तरत।**

वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम्।
वार्धके द:खहरणं हितं सद्ग्रन्थवाचनम्।।
कुसुमं वर्णसम्पन्नं गन्धहीनं न शोभते।
न शोभते क्रियाहीनं मधुरं वचनं तथा।।

**एकवाक्येन उत्तरत।**

3. वाचनं कदा ज्ञानदं भवति ? 1

4. कीदृशं कुसुमं न शोभते ? 1

**एकस्य गद्यखण्डस्य अनुवादं स्वभाषया लिखत।** 2

5. अथ प्रसन्नः माधवः स्वधेनुम् अहर्निशम् असेवत। सः तस्याः रज्जुं धृत्वा तस्यै तृप्तिपर्यन्तं प्रभूतं घासादिकम् अयच्छत्, जलम् अपाययत्, विषाणयोः तैलम् अकरोत्। प्रातः सायं च तां तिलकम् अकरोत्। कदाचित् गुडादिकमपि अभोजयत्। स सर्वदा चिन्तयति स्म "एकवारं ग्रहिष्यामि पयोऽस्याः प्राज्यमुत्सवे।

**अथवा**

देवेशः – अद्य स्वतन्त्रता-दिवसः। अस्माकं विद्यालयस्य प्राचार्यः ध्वजारोहणं करिष्यति। छात्राश्च सांस्कृतिककार्यक्रमान् सादरिकरिष्यन्ति। अन्ते मधुरवितरणं भविष्यति।

डेविडः – शुचे! जानासि त्वम् ? अस्माकं ध्वजस्य किं नाम ?

शुचिः – अरे! कः एतादृशः भारतीयः यः अस्य ध्वजस्य विषये न जानाति ? अस्माकं देशस्य ध्वजः त्रिवर्णः इति।

**वाक्यांशयोः मेलनं कुरुत।**

| | | | |
|---|---|---|---|
| 6. | चन्द्रनाथपर्वतः | माण्डवीनद्याः जले। | 1 |
| 7. | मत्स्यव्यवसायः | दुग्धहीनाऽभवत्। | 1 |
| | | भूतनाथशिला। | |

**एकस्य पद्यखण्डस्य अनुवादं स्वभाषया लिखत।** 2

8. यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।

लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति।।

**अथवा**

वृथाभ्रमणकुक्रीडापरपीडापभाषणैः।

कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत्।।

**एकस्य प्रश्नस्य उत्तरं स्वभाषया लिखत।**

9. चन्द्रनाथपर्वतस्य वर्णनं कुरुत। 2

**अथवा**

माधवः धेनोः सेवां कथम् अकरोत् ?

**पूर्णवाक्येन संस्कृतभाषया उत्तरं लिखत।**

10. भाऊसाहेबमहाभागस्य स्मारकं कुत्र शोभते ? 1

11. जनाः क्षारजलेन किं लभन्ते ? 1

**सुभाषितं शुद्धं पूर्णं च लिखत।** 2

12. मनुजा वाचनेनैव ..................।।

**द्वितीयखण्डः (अपठितावबोधनम्)**

**अधः दत्तं गद्यखण्डं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत।**

वृक्षाः लताः च न केवलं मानवानाम् अपि तु अन्यप्राणिनाम् उपकारकाणि मित्राणि। स्वयम् आतपे तिष्ठन्ति परेषां तापं हरन्ति। केचन वृक्षाः उत्तुङ्गाः, केचित् वामनाः। विविधाः तरवः नैकविधानि गृहोपकरणानि प्रयच्छन्ति। अधुना स्वार्थपराः जनाः वृक्षान् कृन्तन्ति। वृक्षाणाम् अभावेन पर्यावरणस्य आर्द्रता विनश्यति, पर्जन्यस्य अभावेन च अवर्षणं भवति।

13. वृक्षाः लताः च केषाम् उपकारकाणि मित्राणि ? 1

14. के वृक्षान् कृन्तन्ति ? 1

15. वृक्षाणाम् अभावेन किं भवति ? 1

**एकं परिच्छेदं स्वभाषया अनुवदत।** 3

16. 'रामपूरम्' इति अस्माकं ग्रामस्य नामधेयम्। महाराष्ट्रराज्यस्य सातारामण्डले एषः ग्रामः वर्तते। एका नदी अस्माकं ग्रामस्य पार्श्वभागे वहति। तस्याः तीरे मन्दिरम् अस्ति। अस्माकं ग्रामजनाः धर्मनिष्ठाः, उत्सवप्रियाः च। ते मिलित्वा आनन्देन सौहार्देन निवसन्ति। ग्रामे एकः विद्यालयः अस्ति। तत्र बालकाः बालिकाः च पठन्ति।

**अथवा**

वयं सर्वे भारतदेशे निवसामः। अस्माकं नामधेयानि, राज्याणि, नगराणि च भिन्नानि। अस्माकं मातृभाषा अपि विविधाः। भारतीयाः गुजराती-मराठी-पंजाबी-सिन्धी-कन्नडादिभाषाः भाषन्ते। भारतीयानां वेषाः, भाषाः च भिन्नाः सन्ति, किन्तु सर्वभाषासु समाना प्राचीना एका भाषा। सा संस्कृतभाषा।

## तृतीयखण्डः (व्याकरणम्)

**अधोलिखितवाक्ययोः रिक्तस्थानयोः उचितानिपदानि कोष्ठकात् चित्वा लिखत।**

17. तौ सत्वरं ................ गृहाद् दशघटान् अक्रीणाताम्। 1

- कुम्भकारे
- कुम्भाकारात्
- कुम्भकारस्य
- कुमभकारम्

18. स्वतन्त्रतायाः आन्दोलने अस्य ध्वजस्य महती भूमिका ................। 1

- आसीः
- आस्तम्
- आसन्
- आसीत्

**सूचनानुसारं द्वयोः वाक्ययोः परिवर्तनं कृत्वा लिखत।**

19. महिलाः आपणं गच्छन्ति। 1

(एकवचने परिवर्तयत)

**अथवा**

यज्ञे 50 लिटरमितस्य दुग्धस्य आवश्यकता भवति।

(अङ्कस्थाने संङ्ख्यावाचिपदं लिखत)

20. अहं भवनस्य निर्माणं करोमि। 1

(वाक्यं भविष्यत्काले परिवर्तयत)

**अथवा**

अहं नदी अस्ति।

(वाक्यं संशोध्य लिखत)

**रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत।**

21. अशोकचक्रस्य ध्वजे महत्वम् अस्ति। 1

22. चन्द्रनाथपर्वते अनेके उत्सवाः प्रचलन्ति। 1

**तालिकायां रिक्तस्थानेषु समस्तपदं विग्रहवाक्यं समासनाम वा लिखत।**

| | समस्तपदम् | विग्रहः | समासनाम | |
|---|---|---|---|---|
| 23. | सङ्गीतसाधना | .................. | षष्ठी तत्पुरुषः | 1 |
| 24. | ................ | अहः च निशा च | द्वन्द्वसमासः | 1 |

**विलोमपदं चित्वा लिखत।** 1

25. दूरम्

- बृहत्
- समीपम्
- सर्वत्र
- शीघ्रम्

**पर्यायपदं चित्वा लिखत।** 1

26. उपकारः

- अवकारः
- अपकारः
- अउपकारः
- नपकारः

## चतुर्थखण्डः (रचना)

27. **कोष्ठकात् उचितपदानि चित्वा द्वे सार्थवाक्ये लिखत।** 2

| | | | |
|---|---|---|---|
| (1) | जनाः | गीतं | करोति। |
| (2) | त्वं | कुम्भं | पश्यन्ति। |
| (3) | कुम्भकारः | चित्रं | गायसि। |

28. **अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत।** 4

(1) कच्छपः अपि सिद्धः भवति पर्वतशिखरं गन्तव्यम् इति निश्चितम् भवति।

(2) अतः एकदा शशकः "कच्छपेन सह सर्धां करोमि" इति निश्चयं करोति।

(3) एकस्मिन् वने शशकः कच्छपः निवसतः स्म।

(4) कच्छपः मन्दं चलित्वा पर्वतशिखरं प्रप्नोति।

(5) शशकः जागरितः भवति, शीघ्रं धावित्वा पर्वतशिखरं गच्छति।

(6) शशकः शीघ्रं धावति, शशकः वृक्षस्य अधः स्वपिति।

(7) शशकः शीघ्रं धावति कच्छपः मन्दं चलति।

(8) कच्छपं तत्र दृष्ट्वा शशकः लज्जितः भवति, कच्छपः स्पर्धायां जयं प्राप्नोति।

29. **चित्रम् आधृत्य चत्वारि संस्कृतवाक्यानि लिखत।** 2

(छात्राः, जलप्रवाहः, कन्दुकः, क्रीडनकम्, वृक्षाः, वहति)



1